# Shri Batukabhairava Bakaradi Sahasranamastotram 3

# श्रीबटुकभैरवबकारादिसहस्रनामस्तोत्रम् ३

## Document Information


Text title : Shri Batukabhairava Bakaradi Sahasranamastotram 3

File name : baTukabhairavabakArAdisahasranAmastotram3.itx

Category : shiva, sahasranAma

Location : doc_shiva

Proofread by : Rajesh Thyagarajan

Latest update : September 18, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


September 19, 2024

*sanskritdocuments.org*

# श्रीबटुकभैरवबकारादिसहस्रनामस्तोत्रम् ३

उक्तं च भैरवयामलतन्त्रे ।
श्रीपार्वत्युवाच ।
यद्गुह्यं परमाख्यातं त्रिषु लोकेषु दुर्लभम् ।
कोटिग्रन्थेषु गोप्यं यत्सूचितं न प्रकाशितम् ॥ १॥

सर्वसम्पत्प्रदं पुण्यं सर्वापत्क्षयकारकम् ।
तदहं श्रोतुमिच्छामि बटुकस्य महात्मनः ॥ २॥

नाम्नां सहस्र दिव्यानां बकाराख्यं महात्मनाम् ।
कृपया वद देवेश यद्यहं तव वल्लम्भा ॥ ३॥

श्रीमहादेव उवाच ।
सूचितं मे त्वयि स्नेहादप्रकाश्यं कुलेश्वरि ।
नाम्नां सहस्रं कोटीनां सारतः सारमुत्तमम् ॥ ४॥

न वक्तव्यं त्वया देवि चित्तस्थं मम पार्वति ।
अप्रकाश्यतमं देवि प्राणेभ्यो ये परे प्रिये ॥ ५॥

ब्रह्मभैरवोवाच ।
इत्युक्त्वा भगवान्देवो बोध्यः स्वात्मानमात्मना ।
पुलकाञ्चितसर्वाङ्गो न च किञ्चिदुवाचह ॥ ६॥

श्रीपार्वत्युवाच ।
देवदेव महादेव भक्तानुग्रहकारक ।
नाम्नां सहस्रं दिव्यानां बकाराख्यं शुभप्रदम् ॥ ७॥

गोप्यं तु सर्वगोप्यानां वद मे परमेश्वर ।
अप्रकाश्यं कुलेशान यद्यहं प्राण वल्लभा ॥ ८॥

श्रीमहादेव उवाच ।
शृणु देवि महागुह्यं रहस्यं परमाद्भुतम् ।

न कस्यचिन्मया ख्यातमद्यापि प्राणवल्लभे ॥ ९॥

सुखसम्पत्प्रदं देवि धनधान्यजयप्रदम् ।
भूतग्रहपिशाचानां स्मरणादेव नाशनम् ॥ १०॥

कृत्याद्रोहादिशमनं बालग्रहनिवारणम् ।
चतुर्वर्गचतुर्भद्रगदमेतन्न संशयः ॥ ११॥

बटुकस्येह नामानि प्रयुतान्यर्बुदानि च ।
सारात्सारतरं शेषं सहस्रं शृणु यत्नतः ॥ १२॥

सुधासिन्धुमणिद्वीपे पारिजातवनावृते ।
प्रक्षालयतु भूमध्ये शेतभूतस्थमीश्वरम् ॥ १३॥

विपरीतरतासक्तं कौमारं विलसद्धृदि ।
चतुर्बाहुं त्रिनयनमञ्जनाद्रिसमप्रभम् ॥ १४॥

जटाजूटधरं देवं शशाङ्ककृतशेखरम् ।
भुजङ्गमेखलायुक्तं दिग्वाससमनाकुलम् ॥ १५॥

डमरुं च कपालं च वरं शूलं क्रमात्करैः ।
दूधतं च कटैर्दतेः करालवदनं विभुम् ॥ १६॥

ध्यात्वैवं साधकस्तुष्टो जपेत्सिद्धिमवाप्नुयात् ।
ब्रह्मभैरव उवाच ।
नाम्ना सहस्रं दिव्यानां बटुकस्य महात्मनः ॥ १७॥

वक्ष्यामि तत्त्वतः सम्यक् सारेभ्यः सारमुत्तमम् ।
सर्वमङ्गलमाङ्गल्यं सर्वोपद्रवनाशनम् ॥ १८॥

सर्वपापहरं पुण्यं साधकानां सुखप्रदम् ।
आयुः पुष्टिश्रीकरं च पुत्रपौत्रादिवर्धनम् ॥ १९॥

बटुकस्तोत्रमुख्यस्य महादेव ऋषिः स्मृतः ।
महाबटुकभैरवो देवता परिकीर्तिता ॥ २०॥

छन्दो विराट् सर्वकार्ये सिद्ध्यर्थे साधकस्य तु ।
बटुकस्य चतुर्थ्येतं विनियोगः प्रकीर्तितः ॥ २१॥

महादेवेन यत्प्रोक्तं पार्वत्यै सर्वमङ्गलम् ।
सर्वशत्रुक्षयकरं सर्वापद्विनिवारणम् ॥ २२॥

सर्ववेदाङ्गमुख्यं च सारात्सारांशमुत्तमम् ।
देवदेवेन यत्प्रोक्तं हिमाचलसुतां प्रति ॥ २३॥

अत्युग्रकृतिभूताङ्गीं कारुण्यात्प्रीतचेतसा ।
तदेव ते प्रवक्ष्यामि गुरुभक्ताय साम्प्रतम् ॥ २४॥

अतियत्नान्मया प्राप्तं दक्षिणाक्रमयोगतः ।
तदहं सम्प्रवक्ष्यामि यच्छ्रुतं परमाद्भुतम् ॥ २५॥

कुलीनाय च शान्ताय भक्ताय च सुबुद्धये ।
धनमानप्रदात्रे च देवार्चनरताय च ॥ २६॥

देवतामानत्यक्ताय धर्मबुद्धिपराय च ।
वदान्याय च योग्याय प्रणयायादृतात्मने ॥ २७॥

गोत्रप्रदेयमाज्ञप्तमिति देव्या पुरो मम ।
अतस्तुभ्यं प्रवक्ष्यामि करुणार्द्रे महात्मने ॥ २८॥

बटुकस्य च देवस्य मदोन्मत्तस्य शूलिनः ।
स्तोत्रं सहस्रनामाख्यं बकाराख्यं सुसंयुतम् ॥ २९॥

यस्य स्मरणमात्रेण श्रवणेन प्रयत्नतः ।
पठनात्पाठनाद्वापि सर्वसिद्धिमुपालभेत् ॥ ३०॥

यत्र स्थितमिदं स्तोत्रं तत्र श्रीस्सर्वतो मुखी ।
तत्र सर्वत्र विजयो भवत्येव न संशयः ॥ ३१॥

तत्र लोका वशे सर्वे सर्वेषां भैरवस्य तु ।
उपमन्यो बहुत्वेकं न वाच्यं यस्य कस्यचित् ॥ ३२॥

गुरुं सन्तोष्य यत्नेन पठितव्यं समाहितैः ॥ ३३॥

ब्रह्मभैरव उवाच ।
ॐ अस्य श्रीबटुकभैरवस्य बकाराख्यसहस्रनामस्तोत्रस्य ।
महादेव ऋषिः । अनुष्टुप् छन्दः । श्रीबटुकभैरवो देवता ।
बं बीजम् । ह्रीं शक्तिः । क्लीं कीलकम् ।
ममाभीष्टसिद्ध्यर्थे पाठे विनियोगः ।
महादेवर्षये नमः शिरसि ।

अनुष्टुपछन्दसे नमः मुखे ।
श्रीबटुकभैरवदेवतायै नमः हृदये ।
बं बीजाय नमः गुह्ये ।
ह्रीं शक्तये नमः पादयोः ।
ह्रीं कीलकाय नमो नाभौ ।
विनियोगाय नमः सर्वांगे ।
करषडङ्गन्यासः ।
ॐ बां ईशानाय नमः अङ्गुष्ठाभ्याम् ॥
ॐ बीं तत्पुरुष नमः तर्जनीभ्याम् ॥
ॐ बूं अघोराय नमः मध्यमाभ्याम् ॥
ॐ बैं वामदेवाय नमः अनामिकाभ्याम् ॥
ॐ बौं सद्योजाताय नमः कनिष्ठिकाभ्याम् ॥
ॐ बः रौद्राय नमः करतलकरपृष्ठाभ्यां नमः ।
एवं हृदयादि न्यासः ।
ध्यानं तु कामनाविषयेण ध्यात्वा सात्त्विकराजसतामसं च ।

ॐ बं बं बं बटुको वीरो बां बां बां बटुकस्तथा ।
बीं बीं बीं बटुको वीरो बूं बूं बूं बटुकस्तथा ॥ ३४॥

बैं बैं बैं बटुकः क्रोध्यो बौं बौं बौं बटुकस्तथा ।
बः बः बः बटुको रावो ब्रः ब्रः ब्रः शब्दतत्परः ॥ ३५॥

बं यतित बिं बध्वारो बं हृ बं प्रीति कारकः ।
वज्रायुधो वज्रहस्तो वज्रायुधभयावहः ॥ ३६॥

वज्रायुधाङ्गसम्पृष्टो वज्रायुधपदः सदा ।
वज्रायुधस्तुतो वज्री बुधराधवरः स्मृतः ॥ ३७॥

वज्रायुधः सुखकरो वज्रायुधसुखप्रदः ।
वज्रायुधो वज्रश्रेष्ठो वज्रायुधगतिः स्मृ ॥ ३८॥

वज्रायुधः प्राणत्रातो वज्रायुधसुखप्रदः ।
वज्रायुधो वज्रश्रेष्ठो वज्रायुधगतिः स्मृतः ।
वज्रायुधः प्राणत्रातो वज्रायुधपदः स्मृतः ॥ ३९॥

वज्रह तो वज्रपादो वज्रदंष्ट्राग्रजिह्वकः ।
वज्रमुखो वज्रकुलो वज्र स्थापिङ्गलः स्मृतः ।
वज्रायुधप्रियसखो वज्रायुधो वज्रप्रीतिहा ॥ ४० ॥

वज्रायुधप्राणिजातो वज्रायुधवरप्रदः ।
वज्रायुधा शमनो वज्रायुध विधारकः ॥ ४१ ॥

वज्रायुधप्राणदाता वज्रायुधपरायणः ।
वज्रविज्ञानसम्भावो वज्रसेभ्यो वरप्रदः ॥ ४२ ॥

वज्रसेव्यप्रियः प्राणो वज्रसेग्य यः सदा ।
वज्रप्रियो वज्रमयो वज्रतेजप्रवर्त्तकः ॥ ४३ ॥

वज्रनिधिर्वत्रप्राणो वज्रसेन्यवरप्रदः ।
वज्राधीशो वज्रधरो बन्धुपुष्पाजवो धवः ॥ ४४ ॥

बन्धुपुष्प प्रतीकाशो बन्धुद्रुमसमागमः ।
बन्धुपुष्पश्च बन्धूम्रः बन्धुपुष्पजयोद्भवः ॥ ४५ ॥

बन्धुपुष्पप्रपूजश्च बन्धुपुष्पस्वरूपकः ।
बन्धुपुष्पप्रतीकाशो बन्धूकारुण्यविग्रहः ॥ ४६ ॥

बन्धूकारुणनीलो भूः बन्धूकपुष्पवासिनः ।
बन्धूककुसुमस्निग्धो बन्धूकसुमनोत्सवः ॥ ४७ ॥

बन्धूकपुष्पकिरणो बन्धूकपुष्पपालकः ।
बन्धूकसुमनोध्येयो बन्धूकसुमनप्रभः ॥ ४८ ॥

बन्धूकसुमनज्ञाता बन्धूककुसुमाधरः ।
बन्धूककुसुमोल्लासो बन्धूकपुष्पवर्षिणी ॥ ४९ ॥

बन्धूककुसुमानन्दो बन्धूकवनवासिनः ।
बन्धूककुसुमोत्साहो बन्धूकपुष्परूपकः ॥ ५० ॥

बन्धूककुसुमोन्मादो बन्धूकपुष्पधारिणः ।
बन्धूककुसुमाराधो बन्धूककुसुमोद्भवः ॥ ५१ ॥

बन्धूककुसुमप्राणो बन्धूककुसुमार्चितः ।
बन्धूकपुष्पवटिको बन्धूकपुष्प तर्पितः ॥ ५२ ॥

बन्धूक पुष्पमुकुटो बन्धूककुसुमप्रियः ।

बन्धककुसुमाद्भव्यो बन्धूक पुष्पविग्रहः ॥ ५३॥

बन्धूक कुसुमप्रख्यो बन्धूककुसुमात्मकः ।
बन्धककुसुमप्राज्ञो बन्धूक पुष्पवर्तिकः ॥ ५४॥

बन्धूकपुष्पसर्वस्वो बन्धूकपट्टपुरकः ।
बन्धूकपदसर्वस्वो बन्धूकपट्टपूरकः ॥ ५५॥

बकुलपुष्पसम्पूज्यो बकुलपुष्पहोमदः ।
बकुलपुष्पमध्यस्थो बकुलफल भोजनः ॥ ५६॥

बकुलकाननान्तस्थो बकुलावालपाशकः ।
बकुलाचलराध्यश्च बकुलामुखिपुत्रकः ॥ ५७॥

बकुलकुसुमप्रीतो बकुलकुसुमार्चितः ।
बकुलपुष्पनिलयो बकुलपुष्परासिनः ॥ ५८॥

बकुलकुसुमज्ञातो बकुलपुष्पधारकः ।
बकुलकुसुमोल्लासो बकुलपुष्पवर्तिनः ॥ ५९॥

बकुलकुसुमानन्दोबकुलवनवासिनः ।
बकुलकुसुमोत्साहो बकुलपुष्परूपकः ॥ ६०॥

बकुलकुसुमोन्मादो बकुलपुष्पधारकः ।
बकुलकुसुमाराध्यो बकुलकुसुमोद्भवः ॥ ६१॥

बकुलकुसुमप्राणो बकुलकुसुमार्चितः ।
बकुलपुष्पखचितो बकुलपुष्पतर्पितः ॥ ६२॥

बकुलपुष्पमुकुटो बकुलकुसुमप्रियः ।
बकुलकुसुमोदर्पो बकुलपुष्पविग्रहः ॥ ६३॥

बकुलपुष्पमाली च बकुलकुसुमात्मकः ।
बकुलकुसुमप्राज्ञो बकुलपुष्पवर्त्तकः ॥ ६४॥

बकुलपुष्पधारी च बकुलनिन्दकान्तकः ।
बकुलप्रदसर्वस्वो बदरीफल भोजनः ॥ ६५॥

बद्रिकाश्रमवासश्च बद्रिकाचलपुण्ड्रकः ।
वसुदो वसुधाराध्यो वसुदानपरायणः ॥ ६६॥

बहुनेत्रो बहुलास्यो बहुहस्तो बहुप्रदः ।
बह्वाननो बहुकर्णो बहुपापविनाशनः ॥ ६७॥

वल्लभो वल्लभापीतो वल्लभाबहुरूपकः ।
बहुगुणश्च सर्वोधो बहुगुणपरायणः ॥ ६८॥

बहुगुणश्च सम्प्रीतो बहुगुणप्रकाशकः ।
बहुगुणसुसपूज्यो बहुगुणस्वरूपकः ॥ ६९॥

बहुगुणसुसंहृष्टो बहुगुणप्रधारणः ।
बकारवर्णसर्वाङ्गो बकाररूपधारणः ॥ ७०॥

बकारिहस्तिभूषाढ्यो बकारमुकुटस्थितः ।
बकारहृदयाराध्यो बकाराभरणाकृतः ॥ ७१॥

बकारण वधारुष्टो बम्बीजतोषितः सदा ।
वारुणीजयसन्तुष्टो वारुणीपानसुन्दरः ॥ ७२॥

वारुणीचुम्बनानन्दो वारुणीमण्डले स्थितः ।
वारुणीगतगम्यश्च वारुणीप्रेमचन्द्रिकः ॥ ७३॥

वारुणीमुखमध्यस्थो वारुणीगणमण्डितः ।
वारुणी मण्डलानन्तो वारुणीकुण्डरूपिणः ॥ ७४॥

वारुणीमनसा राध्यो वारुणीतत्त्वतः प्रियः ।
वारुणीमोदरसिको वारुणी मोदवासिनः ॥ ७५॥

वारुणीभोगरसिको वारुणीकुचमण्डनः ।
वारुणीयोगमार्गस्थो वारुणीयोगरूपिणः ॥ ७६॥

वारुणीपूजकः प्राणो वारुणीनिन्दकान्तकः ।
वारुणीप्राणसन्मान्यो वारुणीदृष्टिगोचरः ॥ ७७॥

वारुणीकेशसम्मार्जो वारुणीनाभिमध्यगः ।
वारुणीमोदसम्प्रीतो वारुणीमोदरूपकः ॥ ७८॥

वारुणीदास्यसम्प्रीतो वारुणीध्यानतत्परः ।
वारुणीवाक्यरसिको वारुणीकुण्डपूजकः ॥ ७९॥

वारुणीपाननन्दो भूर्वारुणीरति तत्परः ।
वारुणीताण्डवानन्दनायको वारुणार्णवः ॥ ८०॥

वारुणीकुण्डमध्यस्थो वारुणीकुण्डसुन्दरः ।
वारुणीशास्त्रसम्प्रीतो वारुणीमध्यसुन्दरः ॥ ८१॥

वारुणीभोगरसिको वारुणीमृतदीर्घिकः ।
वारुणीसौख्यदः प्रीतो वारुणीचन्द्रसुन्दरः ॥ ८२॥

बिल्वो बिल्वकरो बिल्वो बिल्वपत्रप्रपूजकः ।
बिल्ववृक्षसमागम्यो बिल्वपत्रस्थबिल्वभूः ॥ ८३॥

बिल्वपुष्पप्रियः प्राणो बिल्वपुष्पप्रमोदकः ।
बिल्वपुष्पप्रपूज्योथ बिल्वपुष्पस्वरूपकः ॥ ८४॥

बिल्वपत्रमहोदश्च बिल्वफलप्रभोजनः ।
बिल्वप्रियोबिल्वमयो बिल्ववृक्षनिवासिनः ॥ ८५॥

बिल्ववृद्धिकरो बिल्वप्रियो बिल्वनिषेविनः ।
बिल्वपत्रस्थसर्वाङ्गो बिल्ववृक्षप्रपालकः ॥ ८६॥

विभावसुसमं तेजो विभावसुसमागमः ।
विभावसुर्मन्दगतिर्विभाव सुरिवामतिः ॥ ८७॥

विभावसुप्रपूज्यश्च विभावसुप्रपूजकः ।
बिम्बाधरो बिम्बरूपो विश्वविद्याविनोदनः ॥ ८८॥

विगम्या वेदकर्त्ता च विधिकर्त्ता विधिप्रभः ।
विधिविध्याता विनदो विधिगम्यो विधिवरः ॥ ८९॥

विधिसपत्रमूर्तिश्च वधिशापविमोचकः ।
विधिशास्त्रो विधिप्राज्ञो विदुषो गुरुदेवता ॥ ९०॥

विक्रधिक्रमसञ्चारो विधिशास्त्र विचारणः ।
विविधिक्रमसञ्चारो विविक विविधिक्रमः ॥ ९१॥

विधुपुत्रप्रियसखो विधिपुत्रभयावहः ।
विधिपुत्रपरित्राता विधिपुत्रवरप्रदः ॥ ९२॥

विधुविज्ञानविभवो विधुशीर्षेषु शोभनः ।
विश्वामित्रसुसम्पन्नो विश्वामित्रवरप्रदः ॥ ९३॥

विश्वामित्रमूर्तिधारी विश्वामित्रस्वरूपकः ।

विश्वामित्रगुरुश्रेष्ठो विश्वामित्रप्रभञ्जकः ॥ ९४॥

विश्वामित्रयोगप्रियो विश्वामित्रनुतिप्रियः ।
विश्वामित्रपरिज्ञातो विश्वामित्रयोगक्षमः ॥ ९५॥

विश्वमित्रार्तिशमनो विश्वामित्रार्तिनाशनः ।
विषदो विषदाचारो विषपाने सदा रतः ॥ ९६॥

विमलो विमलाङ्गश्च विमलाचारतत्परः ।
विश्वेश्वरो विश्वराजा विघ्नसङ्घविनाशनः ॥ ९७॥

विनायको विघ्नराजो विघ्नविच्छेदनाशनः ।
बिम्बाधरो बिबरुचिर्विश्व द्याविनोदनः ॥ ९८॥

वीणाधरो वीणानाथ वीणावाद्य परायणः ।
वीरमुख्यो वीरप्रियो वीरस्थायोगणः सदा ॥ ९९॥

वीरमन्त्रो वीरश्रेष्ठो बीरस्त्रीगमनोपरः ।
बुद्धिबुध्याकृतिधरो बुद्धिशावी बुधप्रियः ॥ १००॥

बुद्धिपूर्णो बुद्धिधरो बुद्धिभा बुद्धिदूरगः ।
बुद्धिर्बुद्धवपुर्वृद्धिः शरीरो बुद्धिमण्डितः ॥ १०१॥

बुद्धिप्रभुश्च बुद्धिर्बुद्धिकृतचराचरः ।
बुद्धिप्रणवसन्तुष्टो बुद्धिहीनपराङ्मुखः ॥ १०२॥

बुद्धिभृदबुद्धित्द्दत्कर्ता बुद्धिश्रेष्ठो बुद्धिप्रभुः ।
बुधेशो बुधसन्तुष्टो बुधैकसदनं सदा ॥ १०३॥

बुद्धिमांश्चैव बुद्धिश्च बुद्धिमान्बुद्धिभाजनः ।
बुद्धिप्रणीतपादाग्रो बुद्धिगीतबुधौजसः ॥ १०४॥

बुद्धिमान्बुद्धिसम्पन्नो बुद्धया नन्दितमानसः ।
बुद्धिमार्गप्रणेता च बुद्धिसञ्चारचातुरः ॥ १०५॥

बुद्धिगौणो बुध्याधारो बुद्धिसम्बुद्धिचेतनः ।
बुद्धिरुद्बुद्धित्द्दन्नित्यं बुध्याग्रो बुद्धिपारदः ॥ १०६॥

बुद्धिवृद्धिप्रचारोऽभूद्बुद्धया बुद्धि विवेक वित् ।
बुध्याकरो बुद्धिकरो बुद्धिप्राणविवर्द्धनः ॥ १०७॥

बुद्धिगूढधरो बुद्धिर्बुद्धिसञ्चारचेष्टितः ।
बुद्धिदक्षिणताहार्दो बुद्धिलक्षण तत्त्ववित् ॥ १०८॥

बुद्ध्याचारी बुद्धिहारी बुद्धिसुखप्रदायकः ।
बुद्धिसंस्कृतसञ्चारी बुद्धितत्त्वविवेकवित् ॥ १०९॥

बुद्धिगर्वधरो बुद्धिर्बुद्धिगर्वपराभवः ।
बुद्ध्यधीनो बुद्धितमो बुद्धिलक्षणलालसः ॥ ११०॥

बुद्धिगौरवदाता च बुद्धि दाता बुद्धिप्रदः ।
बुध्योक्तबुद्धिहर्ता च बुद्धिबुद्धिवर्धनः ॥ १११॥

बुद्धिरुद्योगकर्ता च बुद्धिदाता बुद्ध्युत्करः ।
बुद्ध्याचारो बौद्धरूपो बौद्धावतारधृक् सदा ॥ ११२॥

बूं बूं बः बीजस्वरूपो बूं क्षूं हूं मुकुटेश्वरः ।
बूं क्लीं हूं चण्ड कर्ता चलः बूं क्लीं हुं फट् स्वाहा ॥ ११३॥

वेदज्ञो वेदकर्ता च वेदपाठविशारदः ।
वेदप्रियो वेदमयो वेदविद्याविधारकः ॥ ११४॥

वेदपाठकरो वेदव्याख्यानकरणक्षमः ।
वेदाङ्गो वेदरूपश्च वेदमन्त्रस्वरूपान् ॥ ११५॥

वेदवन्द्यो वेदप्राणो वेदपाठो विदाश्रयः ।
वेदान्तगीतचरितो वेदगीतप्रवाहकः ॥ ११६॥

वेदधर्मसम्पन्नोथ वेदधर्मनिकृन्तनः ।
वैद्यो वैद्यपतिर्वै द्यो वैद्यनायकसुन्दरः ॥ ११७॥

वैद्यराजोथ वैद्येशो वैद्यराजनमस्कृतः ।
वैद्यप्रियो वैद्यप्रीतिर्वैद्यत्राणगमोध्यतः ॥ ११८॥

वैद्यनीतिर्गुणो वैद्यो वैद्यानां प्रतिपालकः ।
वैद्यहर्ता वैद्यकरो वैद्यो वैद्यपतिप्रियः ॥ ११९॥

वैद्यराजशिरसिजो वैद्यराजशिषप्र ।
वैद्यराजार्चितपदो वैद्यराजनमस्कृतः ॥ १२०॥

वैद्यराजो वैद्यवेशो वैद्यराजभयावहः ।
बों बों बः बीजरूपश्च बौं बौं बौं बीजरूपकः ॥ १२१॥

वैदेहीवैनको वेद्यो वैद्याचारप्रधारकः ।
वैश्याचारो वैश्यश्रेष्ठो वैश्यानां कुलदेवता ॥ १२२॥

वीरभद्रोथ वीरेशो वीरेन्द्रो वन्दितपदः ।
वीर वन्द्यो वीरप्राणो वीरबाहुर्वीराश्रयः ॥ १२३॥

वीरदैत्यप्राणहारी वीरदैत्यापहारकः ।
वीरार्णवहरो वीरो वीराणां प्राणवल्लभः ॥ १२४॥

वीरधर्मसदाराध्यो वीरधर्मनिकेतनः ।
वीरदैत्यप्राणत्राता वीरदैत्यबलप्रदः ॥ १२५॥

वीरगर्जितसम्पूर्णो वीरब्रह्माण्डगर्जितः ।
वीरपुत्रपरित्राता वीरपुत्रवरप्रदः ॥ १२६॥

वीरपुत्रप्रियसखो वीरपुत्रभयापहः ।
वीरपुत्राभिशमनो वीरपुत्राहिनाशकः ॥ १२७॥

वीरपुत्रप्राणत्राता वीरभक्तिपरायणः ।
वीरविज्ञानविभवो वीरबाहुवरप्रदः ॥ १२८॥

वीरबाहुस्तुतो वीरो बहुशः शापहारकः ।
वीरबाहुप्रियो वीरो बहुगौरववर्द्धनः ॥ १२९॥

वीरबाहुपरित्राता वीरबाहुसुखप्रदः ।
विश्वभुग्विश्वश्रेष्ठोथ विश्वक्षेत्रकरस्तथा ॥ १३०॥

बालार्कवर्णो बालोथ बालार्कतेजसः परः ।
बालो बालप्रियो बालो बालक्रीडापरायणः ॥ १३१॥

वामनो वाग्भवाकारो वाचालो वाक्पतिप्रियः ।
वाचामगोचरो वान्तो वीणावेणुधरोपरः ॥ १३२॥

वाग्भवो वाक्पतिः श्रेष्ठो वाग्देवीप्रियनन्दनः ।
वाग्देवीहृदयानन्दो वाग्देवीगर्भसम्भवः ॥ १३३॥

वाक्सिद्धो वाक्पतिप्राणो वाग्घ्रदो वाक्स्वरूपकः ।
बाणप्रचारो बाणेशो बाणसारविवेकवित् ॥ १३४॥

बाणभूर्बाणसम्पन्नो बाणनन्दितमानसः ।

बाणसन्धानचतुरो बाणसंशयसुन्दरः ॥ १३५॥

बाणयष्ठी बाणधरो बाणसञ्चिसचेतसः ।
बाणरुद्यानभृन्नित्यं बाणज्ञो बाणपादकः ॥ १३६॥

बाणाकारौ बाणकरो बाणप्रियविवर्द्धनः ।
बाणगूढधरो बाणबाधसन्धानचेष्टितः ॥ १३७॥

बाणदो बाणसौहार्दो बाणलाञ्छनतत्त्ववित् ।
वाणीसंस्कृतसञ्चारो वाणीतत्त्वविवेचकः ॥ १३८॥

वरदो वरदः स्वस्थो वरदोभयदायकः ।
वरदद्रणयः पाहुर्वसिष्ठाश्रमसेविनः ॥ १३९॥

वसिष्ठो वसिष्ठाराध्यो वसिष्ठानन्ददायकः ।
वसिष्ठाभीष्टवरदो वसिष्ठाभयदायकः ॥ १४०॥

वसिष्ठप्राणवशको वसिष्ठगणधारकः ।
वामनो वल्लभो वन्यो वनमाला विभूषणः ॥ १४१॥

वनस्थो वनजो वेद्यो वनराजो वनाश्रयः ।
वनेचरो वनाधीशो वानरीवनसेवितः ॥ १४२॥

वानरो वानराधीशो वानरशत्रुनाशनः ।
वानप्रस्थाश्रमकृतो वानप्रस्थयोगप्रदः ॥ १४३॥

ब्रह्मयोनिर्बृहद्योनि विश्वयोनिर्विवेकवान् ।
ब्रह्मविद्ब्रह्मभावश्च ब्रह्मर्षिर्ब्राह्मणप्रियः ॥ १४४॥

ब्रह्मदो ब्राह्मणात्मा च ब्रह्मविद्याप्रकाशकः ।
ब्रह्मचारी ब्रह्मवेत्ता ब्राह्मणो ब्राह्मणोत्तमः ॥ १४५॥

ब्रह्मपुत्रविधेयात्मा ब्रह्मसूत्रार्थनिर्णयः ।
ब्रह्मगौरवदाता च ब्रह्माण्डो ब्रह्माण्डेश्वरः ॥ १४६॥

व्योमगम्यो व्योमेशानां व्योमेशभवसुन्दरः ।
व्योमगम्यो व्योमधारो ब्रह्मगीतप्रचारकः ॥ १४७॥

व्योमब्रह्मोपगीतश्च व्योमज्ञो व्योमपारदः ।
व्योमचरो व्योमरूपो व्योमकेशोति शोभनः ॥ १४८॥

व्यालाधिपो व्यालेशानो व्यालस्थो व्यालगः सदा ।
व्यालमुखो व्यालकर्णो व्यालायतनशोभनः ॥ १४९॥

व्यालशायी व्यालश्रेष्ठो व्याघ्राजिनप्रधारकः ।
वृषाकपी वृषेयात्मा वृषारूढो वृषोदरः ॥ १५०॥

वृषहा वृषभश्रेष्ठो वृषपर्वा वृषोदरः ।
वृषगम्यो वृषेशानो वृषगतिवृहच्छिखः ॥ १५१॥

ब्रह्मधर्मप्रचारोथ बृहच्छत्रप्रपाठकः ।
बृहद्गतिबृहत्कण बृहद्दन्तालिशोभनः ॥ १५२॥

विश्वात्मा विश्वकर्मा च विश्वेषां परमो हितः ।
विश्वाश्रयो विश्वव्यापी विश्वबन्धुर्विश्वक्रतुः ॥ १५३॥

विश्वकर्ता विश्वभर्ता विश्वेशो विश्वभूषणः ।
विभावसुश्च सम्पन्नो विश्वावसुसमागमः ॥ १५४॥

विश्वावसुप्रपूज्यश्च विश्वावसुस्वरूपकः ।
विन्ध्याचलनिवासश्च विन्ध्याचलप्रकारणः ॥ १५५॥

विद्रुमवर्णो विद्रुमोथ विद्रुमायासरारजः ।
वह्नीन्द्रो बीजराजेशो बों बों कों बौद्ध कान्तकः ॥ १५६॥

वां बां बू बीजवणाद्यो बां बां वूं हुं वषट् स्वाहा नमः ।
वङ्कारभैरवो राध्यो वकाराक्षरशो भनः ॥ १५७॥

वं वं कूकूटसंसेरव्यो वं वं कपालिकेशरः ।
वं वं ताण्डवचण्डाख्यो वं वं भूतेशभैरवः ॥ १५८॥

वं हं स्वाहा घोररूपं वं हूं क्लं कामदायकः ।
वैं ह्रीं ह्रां कालान्तकश्चैव वं ह्रं लं तानवर्द्धनः ॥ १५९॥

वं ह्रीं हुं चण्ड निर्नाशो वं ह्रीं हुं वीरभैरवः ।
वौषटूपोथ विश्वारौ वं हं हुं विश्वरूपकः ॥ १६०॥

वुं क्लुं हुं उठ रूपोथ वुं क्लुं हुं फट् वं नमः ।
वुं ह्लुं स्वयं भुभूषाढ्यो ब्रुं ह्रीं हुं लिङ्गरूपकः ॥ १६१॥

ब्रुं भैरव वुं योगीशो ब्रुं बुं मानव सुन्दरः ।
वुं हुं विज्ञानभैरवो वुं हुं ह्रीं ममृतानन्द ॥ १६२॥

ब्रुं हुं ह्रीं सिद्धभैरवः असिताङ्गभैरवः ।
वुं ह्रीं हुं रुरुभैरवः ह्रीं हुं चडभैरवः ॥ १६३॥

ब्रुं ह्रीं हुं क्रोधभैरवो वुं हुं उन्मत्तभैरवः ।
वुं हुं अघोरभैरवः वुं ह्रीं हुं भीतिभैरवः ॥ १६४॥

ब्रुं हुं संहृतिभैरवः ।
ब्रुं हुं संहारभैरवः ॥ ब्रुं हुं अघोरभैरवः ब्रुं हुं विमलभैरवः ॥ १६५॥

वुं ह्रीं हुं ज्ञानदश्चैव वुं ह्रीं हुं महामोदकः ।
वुं ह्रीं हुं वह्निभैरवः वुं वुं महारिक्तभैरवः ॥ १६६॥

वुं हुं महायोगनरः वुं महामोहनाशनः ।
वुं ह्रीं हुं योगकिन्नरः वुं हुं कामविनाशकः ।
वुं ह्रीं ह्रां कामविदाढ्यो वुं ह्रीं हुं मन्मथेश्वरः ॥ १६७॥

वुं हुं धनपतेश्वरः पुं हुं वैकुण्ठनायकः ।
ब्रुं ह्रीं हुं फड्वरूपोथ वुं ह्रीं हुं कालफड्तथा ॥ १६८॥

ब्रुं हुं ह्रीं फट् शीर्षोथ ब्रुं हुं फट्नेत्रत्रयाय वौषट् ।
ब्रुं हुं धूमेशभैरवो ब्रुं हुं नटनागेश्वरः ॥ १६९॥

वुं हुं फट् भवानीश्वरो ब्रुं हुं फट्घोरभैरवः ।
ब्रुं ह्रीं हुं घोसवाणाख्यो ब्रुं ह्रीं हुं वादिभैरवः ॥ १७०॥

वुं ह्रीं हुं दिग्भैरवोथ वुं ह्रीं हं घण्टाभैरवः ।
वुं ह्रीं हुं नमनानन्दो वुं ह्रीं हुं नेत्रपदेश्वरः ॥ १७१॥

वुं हुं त्रिपुरभैरवः वुं हुं त्रैलोक्यभैरवः ।
वुं ह्रीं हुं स्तम्भनेश्वरो वुं ह्रीं हुं गुणसागरः ॥ १७२॥

वुं ह्रीं हुं शक्तिदायिन्यो ब्रुं ह्रीं हुं बीजगर्भभृत् ।
ब्रुं ह्रीं श्रीकण्ठेश्वरो ब्रुं ह्रीं हुं श्रीकण्ठेश्वरः ॥ १७३॥

वुं ह्रीं हुं सूत्रभैरवः ब्रुं ह्रीं हुं रक्तभैरवः ।
ब्रुं ह्रीं हुं त्रिमूर्तीश्वरो वुं ह्रीं हुं अर्थेशभैरवः ॥ १७४॥

वुं हुं सद्योजातेश्वरो वुं हुं अनुग्रहेश्वरः ।
वुं ह्रीं हुं अक्रूरेश्वरो वुं ह्रीं हुं चण्डिकेश्वरः ॥ १७५॥

ब्रुं हुं पञ्चत्वकेश्वरो ब्रुं हुं शिवोत्तमेश्वरः ।
व्रुं ह्रीं हुं दारुकेश्वरो व्रुं हुं सकनेत्रेश्वरः ॥ १७६ ॥

ब्रुं ह्रीं हुं चतुराननेश्वरो व्रुं ह्रीं हुं लाङ्गलीश्वरः ।
हुं ह्रीं अर्धनारीश्वरो ब्रुं हुं उमाकान्तेश्वरः ॥ १७७॥

ब्रुं ह्रीं हुं त्रिमूर्तीश्वरो ब्रुं ह्रीं हुं फट्गणेश्वरः ।
ब्रुं हुं मयो बहुगुणो ब्रुं ह्रीं हुं पाठतत्परः ॥ १७८॥

वुं हुं फट् व्रुं हुं फट् ब्रुं हुं फट् ब्रुं हुं फट् ।
ब्रुं हुं फट् ब्रुं हुं फट् स्वाहा रूपकः ॥ १७९ ॥

ब्रुं हुं फट् हुं फट् वषट् ब्रुं हुं फट् ।
वौषट् ब्रुं ॐ जपसन्तुष्टोथ कं ॐ जपपरायणः ॥ १८० ॥

ब्रुं हुं फट् सिद्धिविद्या च ब्रुं हुं फट् लक्ष्मीश्वरः ।
ब्रुं हुं फट् वसुधामीनो ब्रुं हुं फट् सुराधिपाइनः ॥ १८१ ॥

ब्रुं हुं फट् शारदापुत्रो ब्रुं हुं फट् माहेश्वरीपुत्रः ।
ब्रुं हुं राक्षसीपुत्रो ब्रुं हुं हुं फट् वरेशीपुत्रकः ॥ १८२ ॥

हुं फट् यक्षिणीपुत्रो ब्रुं हुं फट् कुलेशीपुत्रः ।
ब्रुं हुं फट् ज्ञानपुत्रो ब्रुं हुं फट् शाकिनी पुत्रः ॥ १८३ ॥

ब्रुं ह्रीं तीक्ष्णदंष्ट्रापुत्रो ब्रुं ह्रीं तीक्ष्णजिह्वापुत्रः ।
ब्रुं नं फट् हाकिनीपुत्रो ब्रुं हुं फट्शाकिनी पुत्रः ॥ १८४॥

ब्रुं हुं फट् डाकिनीपुत्रो ब्रुं हुं फट् लाकिनीपुत्रः ।
ब्रुं हुं फट् मोहिनीपुत्रो हुं फट् ठागिनीपुत्रः ॥ १८५॥

ब्रुं हुं फट् स्तम्भिनीपुत्रो हुं फट् जृम्भणीपुत्रः ।
हुं फट् उर्वशीपुत्रो हुं फट् मेनकापुत्रः ॥ १८६ ॥

ब्रुं हुं फट् रम्भापुत्रो ब्रुं हुं फट् घृताचीपुत्रः ।
ब्रुं हुं ऊर्ध्वमुखीपुत्रो ब्रुं हुं उर्ध्वकेशीपुत्रः ॥ १८७॥

ब्रुं हं फट् तुडिपुत्रोथ ब्रुं हुं फट् लोलाक्षीपुत्रः ।
ब्रुं हुं ललजिह्वापुत्रो ब्रुं हुं फट् रक्ताक्षापुत्रः ॥ १८८॥

ब्रुं हुं फट् गन्दिनीपुत्रो ब्रुं हुं फट् डंशि नीपुत्रः ।
ब्रुं हुं फट् दण्डिनीपुत्रो ब्रुं हुं फट् ध्वजिनीपुत्रः ॥ १८९ ॥

ब्रुं फट् खड्गिनीपुत्रो ब्रुं हुं फट् शङ्खिनी पुत्रः ।
ब्रुं हुं फट् कम्पिनीपुत्रो ब्रुं हुं फट् हासिनीपुत्रः ॥ १९०॥

ब्रुं ह्रीं फट् तारिणीपुत्रो ब्रुं हुं फट् पुरायिपुत्रः ।
ब्रुं हुं फट् कालीपुत्रो ब्रुं हुं फट् कपालीपुत्रः ॥ १९१॥

ब्रुं हुं फट् तारिणीपुत्रो ब्रुं हुं फट् त्रिपुरापुत्रः ।
ब्रुं हुं फट् षोडशीपुत्रो ब्रुं नं फट् भुवनेशीपुत्रः ॥ १९२॥

ब्रुं हुं फट् शन्वेशीपुत्रो ब्रुं हुं फट् धूमावतीपुत्रः ।
ब्रुं हुं फट् बगलापुत्रः ब्रुं हुं फट् मातङ्गीपुत्रः ॥ १९३॥

हुं फट् बगलापुत्रो ब्रुं हुं फटू त्रिकुटापुत्रः ।
ब्रुं हुं फट् अचलापुत्रो ब्रुं हुं फट् भूधरापुत्रः ॥ १९४॥

ब्रुं हुं फट् कल्मषापुत्रो ब्रुं हुं फट् कल्पासिपुत्रः ।
ब्रुं हुं फट् भोगदापुत्रो ब्रुं हुं फट् भाविकापुत्रः ॥ १९५॥

ब्रुं हुं फट् विजयापुत्रो ब्रुं हुं फट् कुरूपापुत्रः ।
ब्रुं हुं फट् ईश्वरीपुत्रो ब्रुं हुं फट्  रेवतीपुत्रः ॥ १९६॥

ब्रुं हुं फट् त्रिनेत्रापुत्रो ब्रुं हुं फट् कुरूपापुत्रः ।
ब्रुं हुं फट् स्वरूपापुत्रो ब्रुं हुं फट् त्रिपुरापुत्रः ॥ १९७॥

ब्रुं हुं फट् चर्चिकापुत्रो ब्रुं हुं फट् अविकापुत्रः ।
ब्रुं हुं फट् वैदमविपुत्रो ब्रुं हुं फट् कौशिकी पुत्रः ॥ १९८॥

ब्रुं हुं फट् वाराहीपुत्रो ब्रुं हुं फटू माहेश्वरीपुत्रः ।
ब्रुं हुं फट् भद्रापुत्रो ब्रुं हुं फट् धृतीपुत्रः ॥ १९९॥

ब्रुं हुं फट् शान्तिपुत्रोथ ब्रुं ह्रीं हुं फट् शिवापुत्रः ।
ब्रुं हुं फट् क्षमापुत्रो ब्रुं हुं फट् सिद्धिपुत्रकः ॥ २००॥

ब्रुं हुं फट् तुष्टिपुत्रो ब्रुं हुं फट् सिद्धिपुत्रकः ।
ब्रुं हुं फट् रतिपुत्रोथ ब्रुं हुं फट् श्रीपुत्रकः ॥ २०१॥

ब्रुं हुं फट् दीप्तापुत्रो ब्रुं हुं फट् कान्तिपुत्रकः ।
ब्रुं हुं फट् लक्ष्मीपुत्रो ब्रुं हुं फट् श्रीपुत्रकः ॥ २०२॥

ब्रुं हुं फट् दीप्तापुत्रो ब्रुं हुं फट् कान्तिपुत्रकः ।

ब्रुं हुं फट् लक्ष्मीपुत्रो ब्रुं हुं फट् श्रीपुत्रकः ॥

ब्रुं हुं फट् रतिपुत्रोथ ब्रुं हुं फट् ब्रह्मपुत्रक ।
ब्रुं हुं फट् कदमापुत्रो ब्रुं हुं फट् आर्यापुत्रकः ॥ २०३॥

ब्रुं हुं फट् फट् सतीपुत्रोथ ब्रुं हुं फट् रुन्धतिपुत्रः ।
ब्रुं हुं फट् गङ्गापुत्रोथ ब्रुं हुं फट् गोमतीपुत्रः ॥ २०४॥

ब्रुं हुं फट् रेवापुत्रोथ ब्रुं हुं फट् यमुनापुत्रः ।
ब्रुं हुं फट् भाद्रापुत्रोथ ब्रुं हुं फट् अत्रेयी पुत्रकः ॥ २०५॥

ब्रुं हुं फट् कौशिकीपुत्रो ब्रुं हुं फट् भोगवतीसुतः ।
ब्रुं हुं बाहुदापुत्रश्च ब्रुं हुं कर्मनाशापुत्रकः ॥ २०६॥

ब्रुं हुं कूष्माण्डीपुत्रश्च ब्रुं ब्रुं ह्रीं राक्षसी सुतः ।
ब्रुं हुं दानवीपुत्रश्च ब्रुं हुं पिशाचिपुत्रस्तथा ॥ २०७॥

वह्निगर्भो वह्निनेत्रो वह्नितेजगतीति च ।
वह्नि दृष्टिर्वह्निशान्तो वह्निरूपश्च वह्निभूः ॥ २०८॥

वायुगर्भो वायुगतिर्वायुवाहनतत्परः ।
बाधाकरो बीजरूपो बाधा काशपरायणः ॥ २०९॥

वायुविक्रमसञ्चारी वायुदुर्गतिविक्रमः ।
वह्निहुं फट् विघ्नेश्वरो वह्निहुं फट् विप्रोत्तमः ॥ २१०॥

बं बं एकदन्तभैरवो बं बं विघ्नकृद्भैरवः ।
वं मोदकभैरवोथ वं प्रमोदभैरवस्तथा ॥ २११॥

वं दुर्मुखभैरवो वं सुसुखभैरवेशः ।
वं प्रमोदभैरवोथ वं शोनाभैरवस्तथा ॥ २१२॥

वं उन्मत्तभैरवोथ वं मत्तभैरवस्तथा ।
वं खरमुखभैरवो वै वं लम्बोदरभैरवः ॥ २१३॥

वं वं अमोदभैरवो वं वं मुण्डभैरवस्तथा ।
वक्रतुण्डभैरवो वं वं वामदेवभैरवः ॥ २१४॥

वं दुर्गभैरवश्चैव वं मेघनादभैरवः ।
वं सेनाभैरवश्चैव वं भक्षप्रियभैरवः ॥ २१५॥

वं अरुणमै रवोथ वं श्वेतभैरवस्तथा ।
वं पाण्डुभैरवश्चैव वं नीतिभैरवस्तथा ॥ २१६॥

वं शामभैरवश्चैव वं हरिद्वाख्यभैरवः ।
वं उच्छिष्टभैरवोथ वं कृष्णभैरवस्तथा ॥ २१७॥

वैकल्यकलितश्चैव वैकल्य विधिदर्शिनः ।
वैकुण्ठलोकमङ्गलो बैकुण्ठधामना यकः ॥ २१८॥

वैकुण्ठधामसन्मान्यो वैकुण्ठधामपरायणः ।
वैणमानससञ्चारो वैणमानसमोहनः ॥ २१९॥

वैणसम्भागगमनो वैणकुण्ड निमज्जनः ।
वैणचक्रसमाकीर्णो वैणवीभवनः परः ॥ २२०॥

वैणच क्रो वैणवोथ वैणचक्रनिवारणः ।
वैणावणो वैणधर्मा वैणकर्मपरायणः ॥ २२१॥

वैणसन्तानसम्प्रीतो वैणसन्तानदायकः ।
वैणकर्षणदो वैणताण्डवानन्ददायिनः ॥ २२२॥

वैणगणरतो वैणो वैणमालाविभूषणः ।
वैणसंलापसन्तुष्टो वैणपश्चान्नभोजनः ॥ २२३॥

वैष्णवो वैष्णवाचारो वैष्णवाचारतत्परः ।
वषद्वाहास्वरूपोथ नामसहस्रमुत्तमम् ॥ २२४॥

सारूप्यनामसाहस्रं भैर वस्य प्रकाशितम् ।
देवीशत्रुगणाः सर्वे गच्छन्ति यममन्दिरे ॥ २२५॥

एकरात्रिप्रयोगेण सप्ताहाद्रिपुनाशनम् ।
ग्रहणे राशिनः स्थित्वा य एकान्ते महात्मनः ॥ २२६॥

विल्वस्य मूले प्रजपेदयुतं श्रद्धया युतः ।
तस्य शत्रुगणेन्योन्यं जायते कलहो भृशम् ॥ २२७॥

श्मशाने तु समागत्य दिक्पालबलिमाहरेत् ।
तत्कृष्णान्नादिसम्मिश्रं निर्भयः साधकोत्तमः ॥ २२८॥

भवेयुस्तत्क्षणादेव सिद्धा विद्याश्चतुर्दश ॥ २२९॥

स पश्येद्देवतां तत्र वरदानकृतोद्यमाम् ।
यद्वदेत्प्रथमं देवी तत्र भूमौ समाहितः ॥ २३०॥

द्वितीयवाक्योऽपि तथा यत्नवान्प्रयतो भवेत् ।
अथ सुश्लक्ष्णया वाचा प्रार्थयेन्मनसः फलम् ॥ २३१॥

ततोन्यं परमं वक्ष्ये विधिं लोकैकहेतवे ।
साद्यकश्चाति रमणां वाञ्छयेदपि यो स्त्रियम् ॥ २३२॥

स्थित्वा कनकमलेऽपि व्याघ्रचर्मणि देशिकः ।
रक्ताम्बरपरीधानो रक्त माल्यानुलेपनः ॥ २३३॥

पूजयित्वा महेशानं कनकपुष्पेण वार्चितम् ।
यन्नाम्ना प्रयतो मन्त्रं प्रजपेच्च विच क्षणः ॥ २३४॥

क्षणार्द्धे कर्षयेन्नारीमुर्वशीमपि मानवः ।
अनेनैव विधानेन द्रव्यस्याकृष्टिरुत्तमा ॥ २३५॥

कुजेष्टम्यां वटस्येह मूले स्थित्वा विचक्षणः ।
रात्रौ भयचित्तस्तु प्रजपेदयुतं तथा ॥ २३६॥

ध्यात्वा देवं वात रूपं वाचा बन्धनमुत्तमम् ।
सञ्ज्ञाप्याष्टोत्तरशतं यस्मै दद्याज्जपेच्छतम् ॥ २३७॥

स प्राप्नोति पुत्रफलं चिरायुः सहितं मुदा ।
वाचास्तम्भनकामस्तु हरिद्राफलमिश्रितः ॥ २३८॥

एकरात्रौ जपेद्यस्य नाम्ना प्रयतमानसः ।
तस्य जह्वा क्षणात्स्तम्भं मान्यश्चापि वृहस्पतिः ॥ २३९॥

क्षणात्स्तम्भनकामस्तु सर्वत्र लवणान्वितम् ।
कृत्वा तु जुहुयाद्धीमान्सर्वालापांस्तु साधकः ॥ २४०॥

रोगाणां शमने प्रीतिर्होमैक्षुगजीसंयुतम् ।
जुहुयाद्यस्य नाम्ना तु तस्य नश्यन्त्युपद्रवाः ॥ २४१॥

एवं विधानेन सुधीः साधयित्वा विचक्षणः ।
स्तोत्रेद् निर्भयं कुर्यात्साधयेत्साधकोत्तमः ॥ २४२॥

आदौ सुविद्याध्यानं च विनियोगं ततः स्मरेत् ।
पश्चात्पाठं प्रकुर्वाणो भुक्तिं मुक्तिं च विन्दति ॥ २४३॥

संस्थापयेदिष्टमूर्तिं पठेन्नामसहस्रकम् ।
पूजां कर्तुं महेशानि कलशस्य जलेन च ॥ २४४॥

नाम्नामेतज्जपेद्देवं सर्वाज्ञानविनाशकृत् ।
अर्कपुष्पसहस्राणि कर्णिकाकुसुमानि वा ॥ २४५॥

प्रतिनाम समर्पयेत्कलशस्य जलेन च ।
सर्वसिद्धिमवाप्नोति नात्र कार्या विचारणा ॥ २४६॥

एकवारं पठेद्रात्रौ सर्वपापविनाशनम् ।
द्विवारं पठनादेव सान्निध्यकरणं तथा ॥ २४७॥

त्रिवारं च पठेन्नित्यं सर्वग्रहनिवारणम् ।
वर्षैकेन महादेवि शिवरूपो हि निश्चितम् ॥ २४८॥

देयं शाक्ताय शैवाय स्वभक्ताय विशेषतः ।
आत्मतत्त्वं तु विज्ञाय कालीभक्तिपराय च ॥ २४९॥

अभक्तेभ्यः कुशिष्येभ्यः कृपणाय शठाय च ।
नेदं दद्यान्महेशानि ब्रह्महत्या परो भवेत् ॥ २५०॥

भैरवानन्दहृदयं भैरवानन्दभैरवम् ।
हरिः साक्षाद्भवेद्भक्तः भैरवो नात्र संशयः ॥ २५१॥

स्तवनं बटुकस्येदं यः पठेत्प्रयतो नरः ।
सर्वसिद्धिमवाप्नोति सत्यमेव न संशयः ॥ २५२॥

ज्ञानेन तत्परं साक्षाद्ध्यानेन च शिवेन च ।
दत्तात्रेयसमो ज्ञाने गङ्गेव मलनाशने ॥ २५३॥

कामदेव इव स्त्रीणां गन्धर्व इव रूपवान् ।
शत्रुनाशे यमः साक्षाद्धने धनपतिर्यथा ॥ २५४॥

स भवेत्साधकः श्रेष्ठः सत्यं परवचोदितम् ।
य इदं पठते स्तोत्रं शिवेन सह मोदते ॥ २५५॥

ज्ञानधर्मार्थभोगी स्यान्मृते मोक्षपतिर्भवेत् ।
सत्यंसत्यं महादेवि सत्यंसत्यं महेश्वरि ॥ २५६॥

स्तवस्यास्य प्रभावेन शिवेन सह मोदते ।

शिवरूपं गुरुं ध्यात्वा गुरुरूपं शिवं स्मरेत् ॥ २५७॥

एवं भूत्वा पठेद्देवि सर्वसिद्धिमवाप्स्यति ॥ २५८॥

इति श्रीहरिकृष्णविनिर्मिते बृहज्ज्योतिषार्णवे धर्मस्कन्धे
उपसनास्तबके श्रीबटुकभैरवोपासनाध्याये
भैरवयामलतन्त्रे श्रीबकारादिबटुकभैरव
सहस्रनामस्तोत्रनिरूपणं नाम प्रकरणं षष्ठम् ॥ ६ ॥

The bijAkshara-s differ between the
two source texts linked at the end.

Proofread by Rajesh Thyagarajan

*Shri Batukabhairava Bakaradi Sahasranamastotram 3*

pdf was typeset on September 19, 2024

Please send corrections to *sanskrit@cheerful.com*